# Ashtadiggajakrita Manidhamalinga Stuti

# अष्टदिग्गजकृता मणिधामलिङ्गस्तुतिः

## Document Information

Text title : Ashtadiggajakrita Manidhamalinga Stuti

File name : aShTadiggajakRRitAmaNidhAmalingastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 30 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# अष्टदिग्गजकृता मणिधामलिङ्गस्तुतिः

(शिवरहस्यान्तर्गते भीमाख्ये)

ऐरावतः (उवाच)
शान्तं शङ्कमतङ्गकान्तकमुमाकान्तं भजाम्यन्तिक-
स्वान्तानन्तमहान्तकोद्भवभयं किं वोपलक्ष्यं मम ।
विश्वाधीश्वर शाश्वतान्धकहरापारव्यथासंहर
घोरापारभवोरुसागरगदापारादि दुःखं हर ॥ ९॥

पुण्डरीकः (उवाच)
पाहि त्रिणेत्र सुचरित्र पवित्रगात्रं
पाह्यब्जमित्रनयनामलभूतिगात्र ।
मामीशशङ्खधवलेन्दुकलाललाम
पाहीश मामकधिया सकलेषु मित्र ॥ १४॥

वामनः (उवाच)
पाहीन्दिरारमणकारण तारणेड्य
चक्षुःश्रवाभरण कारणहीन शम्भो ।
माराङ्गसंहरण पापनिवारणेश
पाहीन्दुभूषणमहेश गणाग्रगण्य ॥ १९॥

कुमुदः उवाच ।
हे देवदेव जगदीश्वर पञ्चवक्त्र
विश्वम्भराधरणभूषण भीषणेश ।
गौरीमनोरमण सर्वशरण्य शम्भो
आतार्य तारण विभो चरणं नतोऽस्मि ॥ २३॥

अञ्जनः (उवाच)
सरसीरुहनाभवेद(वेत्तृ)वन्द्यं
स्फुरशम्बरवैरिलाञ्छनार्कम् ।

(वरशम्बरवैरिसंहरं हरं तम्) ।
भज भज मनसा शिवाधवां त्वं
भवहरमभयाय चेतसा त्वम् ॥ २७॥

पुष्पदन्तः (उवाच)
कुरु कुरु करुणां शशधरशिशुधर
अतिभयबहुभीतनागलोकरक्षम् ।
शशिहुतवहभानुनेत्रमद्रीश-
प्रियतनयानयनाब्ज भास्करं वन्दे ॥ ३१॥

सार्वभौमः उवाच ।
शङ्गं सङ्गहरं महेशमनधं मातङ्गचर्माम्बरम् ।
गङ्गातुङ्गतरङ्गरङ्गित जटाभारं भुजङ्गाङ्गदम् ॥ ३५॥

मधुमथनाक्षपदाम्बुजं महेशं ।
भज शम्भुं भवबन्धविमोचनाय ॥ ३६॥

सुप्रतीकः (उवाच)
श्रीकालकाल जितसर्वदितिप्रसूत
पातालमूलपदखेलन विश्वलील ।
पाद्यब्जजाच्युतशचीधवपूजिताङ्घ्रे
गौरीमनोहर विलासनिधानशील ॥ ४०॥

॥ इति शिवरहस्यान्तर्गते अष्टदिग्गजकृता मणिधामलिङ्गस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । भीमाख्यः अष्टमांशः । अध्यायः ३० । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 30 . vAvRRittashlokAH ..

Notes:

Aṣṭadiggajāḥ अष्टदिग्गजाः; that include Airāvata ऐरावत, Puṇḍarīka पुण्डरीक, Vāmana वामन, Kumuda कुमुद, Añjana अञ्जन, Puṣpadanta पुष्पदन्त, Sārvabhauma सार्वभौम, Supratīka सुप्रतीक, eulogize Śiva शिव via Śivaliṅga-s शिवलिङ्गाः that they had established in the Maṇidhāma मणिधाम with respective names in the corresponding eight directions Aṣṭadik अष्टदिक् - viz. Pūrve Airāvateśvaram पूर्वे ऐरावतेश्वरम्, Āgneyāṃ Puṇḍarīkeśvaram आग्नेयां पुण्डरीकेश्वरम्, Dakṣiṇe Vāmaneśam दक्षिणे वामनेशम्, Nairṛtyāṃ Kumudeśam

नैर्ऋत्यां कुमुदेशाम्, Paścime Añjaneśam पश्चिमे अञ्जनेशाम्, Vāyavyāṃ Puṣpadanteśvaram वायव्यां पुष्पदन्तेश्वरम्, Uttare Sārvabhaumeśvaram उत्तरे सार्वभौमेश्वरम्, Aiśānyaṃ Supratīkeśvaram, ऐशान्यं सुप्रतीकेश्वरम्.

Proofread by Ruma Dewan

---

*Ashtadiggajakrita Manidhamalinga Stuti*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*